Hari Om

# Diwali Puja Set-up




[Diwali Pooja – Mantras in Sanskrit]

[Diwali Pooja – Mantras in English (Transliteration)]

# - महालक्ष्मीपूजा -

अथ ध्यानम् –

ॐ पद्मासनां पद्मकरां पद्ममालाविभूषिताम्। क्षीरसागरसम्भूतां क्षीरवर्णसमप्रभाम्॥

क्षीरवर्णसमं वस्त्रं दधानां हरिवल्लभाम्। भावये भक्तियोगेन बिम्बेऽस्मिन् सुमनोहरे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। महालक्ष्मीं ध्यायामि।

अथ आवाहनम् –

ॐ सर्वमङ्गलमाङ्गल्ये विष्णुवक्षःस्थलालये। आवाहयामि देवि त्वाम् अभीष्टफलदा भव॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। महालक्ष्मीं आवाहयामि।

अथ आसनम् –

ॐ अनेकरत्नखचितं क्षीरसागरसम्भवे। स्वर्णसिंहासनं देवि स्वीकुरुष्व हरिप्रिये॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। आसनार्थे पुष्पं समर्पयामि।

अथ पाद्यम् –

ॐ गङ्गादिसरिदानीतं गन्धपुष्पसमन्वितम्। पाद्यं ददामि ते देवि प्रसीद परमेश्वरि॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। पादयोः पाद्यं समर्पयामि।

अथ अर्घ्यम् –

ॐ गङ्गानदी-समानीतं सुवर्णकलशस्थितम्। गृहाणार्घ्यं मया दत्तं पुत्रपौत्रफलप्रदे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। हस्तयोः अर्घ्यं समर्पयामि।

अथ आचमनम् –

ॐ प्रसन्नं शीतलं तोयं प्रसन्नमुखपङ्कजे। गृहाणाचमनार्थाय गरुडध्वजवल्लभे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। मुखे आचमनीयं समर्पयामि।

अथ मधुपर्कम् –

ॐ महालक्ष्मि महादेवि मध्वाज्य-दधि-संयुतम्। मधुपर्कं गृहाणेमं मधुसूदनवल्लभे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। मधुपर्कं निवेदयामि।

अथ पञ्चामृतम् –

ॐ पयोदधि-घृतैर्युक्तं शर्करामधुसंयुतम्। पञ्चामृतं गृहाणेदं वरलक्ष्मि नमोऽस्तु ते॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। पञ्चामृतं समर्पयामि।

अथ स्नानीयम् –

ॐ हेमकुम्भस्थितं स्वच्छं गङ्गादि-सरिदाहृतम्। स्नानार्थं सलिलं देवि गृह्यतां सागरात्मजे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। शुद्धोदकस्नानं समर्पयामि।

अथ अभिषेकः –

## ॥ श्रीसूक्तम् ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम्॥ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियम्॥ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ कर्दमेन प्रजाभूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले॥ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् । विन्देयं पुरुषानहम्॥

ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥ ॐ शान्तिः शान्तिः शान्तिः॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः।

अभिषिञ्चयामि। अभिषेकानन्तरं आचमनीयं समर्पयामि।

अथ उद्वर्तनम् –

ॐ श्री महालक्ष्म्यै नमः। (Repeat) उद्वर्तयामि।

अथ वस्त्रम् –

ॐ दिव्याम्बरयुगं सूक्ष्मं कञ्चुकं च मनोहरम्। महालक्ष्मि महादेवि गृहाणेदं मयार्पितम्॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। वस्त्रयुग्मं समर्पयामि।

अथ कण्ठसूत्रम् –

ॐ माङ्गल्यमणि-संयुक्तं मुक्ताविद्रुम-संयुतम्। दत्तं मङ्गलसूत्रं च गृहाण हरिवल्लभे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। कण्ठसूत्रं समर्पयामि।

अथ आभरणम् –

ॐ रत्नताटङ्क-केयूर-हारकङ्कण-भूषिते। भूषणानि महार्हाणि गृहाण करुणानिधे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। आभरणानि समर्पयामि।

अथ गन्धः –

ॐ कर्पूरचन्दनोपेतं कस्तूरीकुङ्कुमान्वितम्। सर्वगन्धं गृहाणाद्य सर्वमङ्गलदायिनि॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः।

दिव्यपरिमल-गन्धान् धारयामि। गन्धस्य उपरि हरिद्राकुंकुमं समर्पयामि।

अथ अक्षताः –

ॐ शालिजातान् चन्द्रवर्णान् स्निग्धमौक्तिक-सन्निभान्। अक्षतान् देवि गृह्णीष्व पङ्कजाक्षस्य वल्लभे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। अक्षतैः पूजयामि।

अथ पुष्पम् –

ॐ मन्दारपारिजाताब्जैः केतक्युत्पलपाटलैः। मल्लिका-जाति-बकुलैः पुष्पैस्त्वां पूजयाम्यहम्॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः।

पुष्पैः पूजयामि। पुष्पमालां धारयामि।

अथ अङ्गपूजनम् –

ॐ वरलक्ष्म्यै नमः – पादौ पूजयामि। महालक्ष्म्यै – गुल्फौ। इन्दिरायै – जङ्घे। चण्डिकायै – जानुनी। क्षीराब्धितनयायै – ऊरू। पीताम्बरधारिण्यै – कटिं। सागरसम्भवायै – गुह्यं। नारायणप्रियायै – नाभिं। जगत्कुक्ष्यै – कुक्षिं। विश्वजनन्यै – वक्षः। सुस्तन्यै – स्तनौ। कम्बुकण्ठ्यै – कण्ठं। सुन्दर्यै – स्कन्धौ। पद्महस्तायै – हस्तान्। बहुप्रदायै – बाहून्। चन्द्रवदनायै – वक्त्रं। चञ्चलायै – चुबुकं। बिम्बोष्ठ्यै – ओष्ठं। अनघायै – अधरं। सुकपोलायै – कपोलौ। फलप्रदायै – फालं। नीलालकायै – अलकान्। शिवायै – शिरः। सर्वमङ्गलायै – सर्वाण्यङ्गानि पूजयामि।

अथ अर्चना – श्रीलक्ष्मी-अष्टोत्तरशत-नामावलिः।

# - श्रीलक्ष्मी-अष्टोत्तरशतनामावलिः -

ॐ श्रीं प्रकृत्यै नमः
विकृत्यै
विद्यायै
सर्वभूतहितप्रदायै
श्रद्धायै
विभूत्यै
सुरभ्यै
परमात्मिकायै
वाचे
पद्मालयायै (10)
पद्मायै
शुचये
स्वाहायै
स्वधायै
सुधायै
धन्यायै
हिरण्मय्यै
लक्ष्म्यै
नित्यपुष्टायै
विभावर्यै (20)
अदित्यै
दित्यै
दीप्तायै
वसुधायै
वसुधारिण्यै
कमलायै
कान्तायै
कामाक्ष्यै
क्रोधसम्भवायै
अनुग्रहप्रदायै (30)
बुद्धये
अनघायै
हरिवल्लभायै
अशोकायै
अमृतायै
दीप्तायै
लोकशोकविनाशिन्यै
धर्मनिलायै
करुणायै
लोकमात्रे (40)
पद्मप्रियायै
पद्महस्तायै
पद्माक्ष्यै
पद्मसुन्दर्यै
पद्मोद्भवायै
पद्ममुख्यै
पद्मनाभप्रियायै
रमायै
पद्ममालाधरायै
देव्यै (50)
पद्मिन्यै
पद्मगन्धिन्यै
पुण्यगन्धायै
सुप्रसन्नायै
प्रसादाभिमुख्यै
प्रभायै
चन्द्रवदनायै
चन्द्रायै
चन्द्रसहोदर्यै
चतुर्भुजायै (60)
चन्द्ररूपायै
इन्दिरायै
इन्दुशीतलायै
आह्लादजनन्यै
पुष्ट्यै
शिवायै
शिवकर्यै
सत्यै
विमलायै
विश्वजनन्यै (70)
तुष्ट्यै
दारिद्र्यनाशिन्यै
प्रीतिपुष्करिण्यै
शान्तायै
शुक्लमाल्याम्बरायै
श्रियै
भास्कर्यै
बिल्वनिलयायै
वरारोहायै
यशस्विन्यै (80)
वसुन्धरायै
उदाराङ्गायै
हरिण्यै
हेममालिन्यै
धनधान्यकर्यै
सिद्धये
स्त्रैणसौम्यायै
शुभप्रदायै
नृपवेश्मगतानन्दायै
वरलक्ष्म्यै (90)
वसुप्रदायै
शुभायै
हिरण्यप्राकारायै
समुद्रतनयायै
जयायै
मंगलादेव्यै
विष्णुवक्षस्स्थलस्थितायै
विष्णुपत्न्यै
प्रसन्नाक्ष्यै
नारायणसमाश्रितायै(100)
दारिद्र्यध्वंसिन्यै
देव्यै
सर्वोपद्रव-वारिण्यै
नवदुर्गायै
महाकाल्यै
ब्रह्माविष्णुशिवात्मिकायै
त्रिकालज्ञानसम्पन्नायै
भुवनेश्वर्यै

ॐ श्री महालक्ष्म्यै नमः।

अथ धूपः –

ॐ वनस्पतिरसोद्भूतं गन्धाढ्यं गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। धूपमाघ्रापयामि।

अथ दीपः –

ॐ दीपं गृहाण देवेशि वर्तित्रय-समन्वितम्। अन्धकारे नमस्तुभ्यम् अज्ञानं विनिवर्तय॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। दीपं सन्दर्शयामि।

अथ नैवेद्यम् –

ॐ नैवेद्यं गृह्यतां देवि भक्तिं मे ह्यचलां कुरु। ईप्सितं मे वरं देहि नित्यतृप्ते नमोऽस्तु ते॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। नैवेद्यं निवेदयामि।

प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा। उदानाय स्वाहा। समानाय स्वाहा। ब्रह्मणे स्वाहा।

अथ दक्षिणा –

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदं शश्वच्छान्तिं प्रयच्छ मे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। सुवर्णपुष्पदक्षिणां समर्पयामि।

अथ स्तुतिः –

## ॥ श्रीमहालक्ष्म्यष्टकम् ॥

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते। शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते॥१॥
नमस्ते गरुडारूढे कोलासुरभयङ्करि। सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते॥२॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि। सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते॥३॥
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि। मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्तु ते॥४॥
आद्यन्तरहिते देवि आदिशक्तिमहेश्वरि। योगज्ञे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥५॥
स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे। महापापहरे देवि महालक्ष्मि नमोऽस्तु ते॥६॥
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि। परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥७॥
श्वेताम्बरधरे देवि नानालङ्कारभूषिते। जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥८॥
महालक्ष्म्यष्टकं स्तोत्रं यः पठेद् भक्तिमान्नरः। सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा॥९॥
एककालं पठेन्नित्यं महापापविनाशनम्। द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितम्॥१०॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्। महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा॥११॥

## ॥ लक्ष्मी अनुग्रहप्राप्तिमन्त्राः ॥

ॐ श्रीं ह्रीं महालक्ष्म्यै एहि एहि सर्वसौभाग्यं देहि मे नमः - महालक्ष्मी

ॐ श्रीं ह्रीं एहि एहि मह्यं हिरण्यं दापय दापय स्वाहा - धनलक्ष्मी

ॐ श्रीं ह्रीं क्लीं सन्तानलक्ष्म्यै सन्तानसमृद्धिं कुरु कुरु नमः - सन्तानलक्ष्मी

ॐ श्रीं ह्रीं क्लीं सौभाग्यलक्ष्म्यै सकलसौभाग्यं देहि मे नमः - सौभाग्यलक्ष्मी

ॐ श्रीं ह्रीं क्लीं वीरलक्ष्म्यै देहसौख्यं देहि मे नमः - वीरलक्ष्मी

ॐ श्रीं ह्रीं क्लीं विजयलक्ष्म्यै सर्वत्र विजयप्रदायिन्यै नमः - विजयलक्ष्मी

ॐ श्रीं ह्रीं क्लीं भाग्यलक्ष्म्यै सकलसौभाग्यं देहि मे स्वाहा- भाग्यलक्ष्मी

ॐ श्रीं ह्रीं श्रीं खड्गलक्ष्म्यै खड्गधारिण्यै नमः - खड्गलक्ष्मी

ॐ श्रीं ह्रीं श्रीं लक्ष्म्यै सर्वकारणभूतेश्यै नमः - कारुण्यलक्ष्मी

ॐ श्रीं ह्रीं श्रीं ग्रहलक्ष्म्यै सर्वग्रहदोषनिवारिण्यै नमः - ग्रहलक्ष्मी

ॐ श्रीं ह्रीं सें ॐ नमो भगवत्यै सर्वकामपूरिण्यै वरलक्ष्म्यै नमः - वरलक्ष्मी

ॐ श्रीं ह्रीं श्रीं ऐश्वर्यप्रदायिन्यै नमः - ऐश्वर्यलक्ष्मी

ॐ श्रीं ह्रीं श्रीं कुबेरलक्ष्म्यै कुबेरसौख्यं देहि मे नमः - कुबेरलक्ष्मी

ॐ श्रीं ह्रीं श्रीं गजलक्ष्म्यै लक्ष्मीकटाक्षं देहि मे नमः - गजलक्ष्मी

ॐ श्रीं ह्रीं श्रीं धैर्यलक्ष्म्यै सर्वसिद्धिं देहि मे नमः - धैर्यलक्ष्मी

अथ मङ्गलनीराजनम् –

## ॥ आरती श्रीलक्ष्मी जी की ॥

ॐ जय लक्ष्मी माता, मैया जय लक्ष्मी माता ।
तुमको निशदिन सेवत, हर-विष्णु-धाता ॥ ॐ...
उमा, रमा, ब्रह्माणी, तुम ही जगन्माता ।
सूर्य-चंद्रमा ध्यावत, नारद ऋषि गाता ॥ ॐ...
दुर्गा रूप निरंजनि, सुख-संपति दाता ।
जो कोई तुमको ध्यावत, ऋद्धि-सिद्धि-धन पाता ॥ ॐ...
तुम पाताल-निवासिनि, तुम ही शुभदाता ।
कर्म-प्रभाव-प्रकाशिनि, भवनिधि की त्राता ॥ ॐ...
जिस घर में तुम रहतीं, सब सद्गुण आता ।
सब संभव हो जाता, मन नहीं घबराता ॥ ॐ...
तुम बिन यज्ञ न होते, वस्त्र न कोई पाता ।
खान-पान का वैभव, सब तुमसे आता ॥ ॐ...
शुभ-गुण मंदिर सुंदर, क्षीरोदधि-जाता।
रत्न चतुर्दश तुम बिन, कोई नहीं पाता ॥ ॐ...
महालक्ष्मी जी की आरति, जो कोइ जन गाता ।
उर आनंद समाता, पाप उतर जाता ॥ ॐ...

ॐ न तत्र सूर्यो भाति न चन्द्रतारकम् नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। मङ्गलनीराजनं समर्पयामि।

अथ पूर्णपुष्पाञ्जलिः –

ॐ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति।

चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति।

य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। हरिः ॐ॥

वेदोक्तमन्त्रपुष्पाञ्जलिं समर्पयामि।

अथ प्रदक्षिणनमस्काराः –

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। प्रदक्षिणनमस्कारान् समर्पयामि।

अथ क्षमापणम् –

ॐ आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि क्षमस्व परमेश्वरि॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि। यत्पूजितं मया देवि परिपूर्णं तदस्तु मे॥

अथ समर्पणम् –

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥

अथ शान्तिमन्त्रः –

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥।

ॐ शान्तिः शान्तिः शान्तिः। हरिः ॐ। श्री गुरुभ्यो नमः। हरिः ॐ॥

# - Mahālakṣmī-pūjā -

***Atha Dhyānam*** –
oṁ padmāsanāṁ padmakarāṁ padmamālāvibhūṣitām,

kṣīrasāgarasambhūtāṁ kṣīravarṇasamaprabhām.

kṣīravarṇasamaṁ vastraṁ dadhānāṁ harivallabhām,

bhāvaye bhaktiyogena bimbe'smin sumanohare.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,
mahālakṣmīṁ dhyāyāmi.

***Atha Āvāhanam*** –
oṁ sarvamaṅgalamāṅgalye viṣṇuvakṣaḥsthalālaye, āvāhayāmi devi tvām abhīṣṭaphaladā bhava.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,
mahālakṣmīṁ āvāhayāmi.

***Atha Āsanam*** –
oṁ anekaratnakhacitaṁ kṣīrasāgarasambhave, svarṇasiṁhāsanaṁ devi svīkuruṣva haripriye.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ, oṁ mahālakṣmyai namaḥ,
āsanārthe puṣpaṁ samarpayāmi.

***Atha Pādyam*** –
oṁ gaṅgādisaridānītaṁ gandhapuṣpasamanvitam, pādyaṁ dadāmi te devi prasīda parameśvari.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,
pādayoḥ pādyaṁ samarpayāmi.

***Atha Arghyam*** –
oṁ gaṅgānadī-samānītaṁ suvarṇakalaśasthitam,
gṛhāṇārghyaṁ mayā dattaṁ putrapautraphalaprade.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ, oṁ mahālakṣmyai namaḥ,
hastayoḥ arghyaṁ samarpayāmi.

***Atha Ācamanam*** –
oṁ prasannaṁ śītalaṁ toyaṁ prasannamukhapaṅkaje,
gṛhāṇācamanārthāya garuḍadhvajavallabhe.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,
mukhe ācamanīyaṁ samarpayāmi.

***Atha Madhuparkam* –**

oṁ mahālakṣmi mahādevi madhvājya-dadhi-saṁyutam,

madhuparkaṁ gṛhāṇemaṁ madhusūdanavallabhe.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

madhuparkaṁ nivedayāmi,

***Atha Pañcāmṛtam* –**

oṁ payodadhi-ghṛtairyuktaṁ śarkarāmadhusaṁyutam,

pañcāmṛtaṁ gṛhāṇedaṁ varalakṣmi namo'stu te.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

pañcāmṛtaṁ samarpayāmi.

***Atha Snānīyam* –**

oṁ hemakumbhasthitaṁ svacchaṁ gaṅgādi-saridāhṛtam,

snānārthaṁ salilaṁ devi gṛhyatāṁ sāgarātmaje.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

śuddhodakasnānaṁ samarpayāmi.

***Atha Abhiṣekaḥ* –**

## Śrīsūktam

oṁ hiraṇyavarṇāṁ hariṇīṁ suvarṇarajatasrajām, candrāṁ hiraṇmayīṁ lakṣmīṁ jātavedo ma āvaha. tāṁ ma āvaha jātavedo lakṣmīmanapagāminīm, yasyāṁ hiraṇyaṁ vindeyaṁ gāmaśvaṁ puruṣānaham. aśvapūrvāṁ rathamadhyāṁ hastinādaprabodhinīm, śriyaṁ devīmupahvaye śrīrmā devīrjuṣatām. kāṁ sosmitāṁ hiraṇyaprākārāmārdrāṁ jvalantīṁ tṛptāṁ tarpayantīm, padme sthitāṁ padmavarṇāṁ tāmihopahvaye śriyam. candrāṁ prabhāsāṁ yaśasā jvalantīṁ śriyaṁ loke devajuṣṭāmudārām, tāṁ padminīmīṁ śaraṇamahaṁ prapadye'lakṣmīrme naśyatāṁ tvāṁ vṛṇe. ādityavarṇe tapaso'dhijāto vanaspatistava vṛkṣo'tha bilvaḥ, tasya phalāni tapasā nudantu māyāntarāyāśca bāhyā alakṣmīḥ. upaitu māṁ devasakhaḥ kīrtiśca maṇinā saha, prādurbhūto'smi rāṣṭre'smin kīrtimṛddhiṁ dadātu me. kṣutpipāsāmalāṁ jyeṣṭhāmalakṣmīṁ nāśayāmyaham, abhūtimasamṛddhiṁ ca sarvāṁ nirṇuda me gṛhāt. gandhadvārāṁ durādharṣāṁ nityapuṣṭāṁ karīṣiṇīm, īśvarīgṁ sarvabhūtānāṁ tāmihopahvaye śriyam. manasaḥ kāmamākūtiṁ vācaḥ satyamaśīmahi, paśūnāṁ rūpamannasya mayi śrīḥ śrayatāṁ yaśaḥ. kardamena prajābhūtā mayi sambhava kardama, śriyaṁ vāsaya me kule mātaraṁ padmamālinīm. āpaḥ sṛjantu snigdhāni ciklīta vasa me gṛhe, ni ca devīṁ mātaraṁ śriyaṁ vāsaya me kule. ārdrāṁ puṣkariṇīṁ puṣṭiṁ piṅgalāṁ padmamālinīm, candrāṁ hiraṇmayīṁ lakṣmīṁ jātavedo ma āvaha. ārdrāṁ yaḥ kariṇīṁ yaṣṭiṁ

suvarṇāṁ hemamālinīm, sūryāṁ hiraṇmayīṁ lakṣmīṁ jātavedo ma āvaha. tāṁ ma āvaha jātavedo lakṣmīmanapagāminīm, yasyāṁ hiraṇyaṁ prabhūtaṁ gāvodāsyo'śvān, vindeyaṁ puruṣānaham.

oṁ mahādevyai ca vidmahe viṣṇupatnī ca dhīmahi, tanno lakṣmī pracodayāt.
oṁ śāntiḥ śāntiḥ śāntiḥ.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

abhiṣiñcayāmi, abhiṣekānantaraṁ ācamanīyaṁ samarpayāmi.

### *Atha Udvartanam* –
oṁ śrī mahālakṣmyai namaḥ, (Repeat) udvartayāmi.

### *Atha Vastram* –
oṁ divyāmbarayugaṁ sūkṣmaṁ kañcukaṁ ca manoharam,

mahālakṣmi mahādevi gṛhāṇedaṁ mayārpitam.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

vastrayugmaṁ samarpayāmi.

### *Atha Kaṇṭhasūtram* –
oṁ māṅgalyamaṇi-saṁyuktaṁ muktāvidruma-saṁyutam,

dattaṁ maṅgalasūtraṁ ca gṛhāṇa harivallabhe.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

kaṇṭhasūtraṁ samarpayāmi.

### *Atha Ābharaṇam* –
oṁ ratnatāṭaṅka-keyūra-hārakaṅkaṇa-bhūṣite, bhūṣaṇāni mahārhāṇi gṛhāṇa karuṇānidhe.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

ābharaṇāni samarpayāmi.

### *Atha Gandhaḥ* –
oṁ karpūracandanopetaṁ kastūrīkuṅkumānvitam,

sarvagandhaṁ gṛhāṇādya sarvamaṅgaladāyini.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ

oṁ mahālakṣmyai namaḥ,

divyaparimala-gandhān dhārayāmi. gandhasya upari haridrākuṁkumaṁ samarpayāmi.

### *Atha Akṣatāḥ* –
oṁ śālijātān candravarṇān snigdhamauktika-sannibhān,

akṣatān devi gṛhṇīṣva paṅkajākṣasya vallabhe.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ,

akṣataiḥ pūjayāmi.

### *Atha Puṣpam* –

oṁ mandārapārijātābjaiḥ ketakyutpalapāṭalaiḥ,

mallikā-jāti-bakulaiḥ puṣpaistvāṁ pūjayāmyaham.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ

oṁ mahālakṣmyai namaḥ,

puṣpaiḥ pūjayāmi. puṣpamālāṁ dhārayāmi.

### *Atha Aṅgapūjanam* –

oṁ varalakṣmyai namaḥ – pādau pūjayāmi, mahālakṣmyai – gulphau, indirāyai – jaṅghe, caṇḍikāyai – jānunī, kṣīrābdhitanayāyai – ūrū, pītāmbaradhāriṇyai – kaṭiṁ, sāgarasambhavāyai – guhyaṁ, nārāyaṇapriyāyai – nābhiṁ, jagatkukṣyai – kukṣiṁ viśvajananyai – vakṣaḥ, sustanyai – stanau, kambukaṇṭhyai – kaṇṭhaṁ, sundaryai – skandhau, padmahastāyai – hastān, bahupradāyai – bāhūn, candravadanāyai – vaktraṁ, cañcalāyai – cubukaṁ, bimboṣṭhyai – oṣṭhaṁ, anaghāyai – adharaṁ, sukapolāyai – kapolau, phalapradāyai – phālaṁ, nīlāḷakāyai – aḷakān, śivāyai – śiraḥ, sarvamaṅgalāyai – sarvāṇyaṅgāni pūjayāmi.

### *Atha Arcanā* – *śrīlakṣmī-aṣṭottaraśata-nāmāvaliḥ*

## *Śrīlakṣmī– aṣṭottaraśatanāmāvali*

oṁ śrīṁ prakṛtyai namaḥ
vikṛtyai
vidyāyai
sarvabhūtahitapradāyai
śraddhāyai
vibhūtyai
surabhyai
paramātmikāyai
vāce
padmālayāyai (10)
padmāyai
śucaye
svāhāyai
svadhāyai
sudhāyai
dhanyāyai
hiraṇmayyai
lakṣmyai
nityapuṣṭāyai
vibhāvaryai (20)
adityai
dityai
dīptāyai
vasudhāyai
vasudhāriṇyai
kamalāyai
kāntāyai
kāmākṣyai
krodhasambhavāyai
anugrahapradāyai (30)
buddhaye
anaghāyai
harivallabhāyai
aśokāyai
amṛtāyai
dīptāyai
lokaśokavināśinyai
dharmanilāyai
karuṇāyai
lokamātre (40)
padmapriyāyai
padmahastāyai
padmākṣyai
padmasundaryai
padmodbhavāyai
padmamukhyai
padmanābhapriyāyai
ramāyai

padmamālādharāyai
devyai (50)
padminyai
padmagandhinyai
puṇyagandhāyai
suprasannāyai
prasādābhimukhyai
prabhāyai
candravadanāyai
candrāyai
candrasahodaryai
caturbhujāyai (60)
candrarūpāyai
indirāyai
induśītalāyai
āhlādajananyai
puṣṭyai
śivāyai
śivakaryai
satyai
vimalāyai
viśvajananyai (70)
tuṣṭyai
dāridryanāśinyai
prītipuṣkariṇyai
śāntāyai
śuklamālyāmbarāyai
śriyai
bhāskaryai
bilvanilayāyai
varārohāyai
yaśasvinyai (80)
vasundharāyai
udārāṅgāyai
hariṇyai
hemamālinyai
dhanadhānyakaryai
siddhaye
straiṇasaumyāyai
śubhapradāyai
nṛpaveśmagatānandāyai
varalakṣmyai (90)
vasupradāyai
śubhāyai
hiraṇyaprākārāyai
samudratanayāyai
jayāyai
maṅgalādevyai
viṣṇuvakṣassthalasthitāyai
viṣṇupatnyai
prasannākṣyai
nārāyaṇasamāśritāyai (100)
dāridryadhvaṁsinyai
devyai
sarvopadrava-vāriṇyai
navadurgāyai
mahākālyai
brahmāviṣṇuśivātmikāyai
trikālajñānasampannāyai
bhuvaneśvaryai

*Oṁ Śrī Mahālakṣmyai Namaḥ*

## *Atha Dhūpaḥ* –

oṁ vanaspatirasodbhūtaṁ gandhāḍhyaṁ gandha uttamaḥ,
āghreyaḥ sarvadevānāṁ dhūpo'yaṁ pratigṛhyatām.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ
oṁ mahālakṣmyai namaḥ, dhūpamāghrāpayāmi.

## *Atha Dīpaḥ* –

oṁ dīpaṁ gṛhāṇa deveśi vartitraya-samanvitam, andhakāre namastubhyam ajñānaṁ vinivartaya.
oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ
oṁ mahālakṣmyai namaḥ, dīpaṁ sandarśayāmi.

***Atha Naivedyam –***

oṁ naivedyaṁ gṛhyatāṁ devi bhaktiṁ me hyacalāṁ kuru,

īpsitaṁ me varaṁ dehi nityatṛpte namo'stu te.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ

oṁ mahālakṣmyai namaḥ, naivedyaṁ nivedayāmi,

prāṇāya svāhā, apānāya svāhā, vyānāya svāhā, udānāya svāhā, samānāya svāhā, brahmaṇe svāhā.

***Atha Dakṣiṇā –***

oṁ hiraṇyagarbhagarbhasthaṁ hemabījaṁ vibhāvasoḥ,

anantapuṇyaphaladaṁ śaśvacchāntiṁ prayaccha me.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ, suvarṇapuṣpadakṣiṇāṁ samarpayāmi.

***Atha Stutiḥ –***

## *Śrīmahālakṣmyaṣṭakam*

namaste'stu mahāmāye śrīpīṭhe surapūjite,
śaṅkhacakragadāhaste mahālakṣmi namo'stu te. (1)

namaste garuḍārūḍhe kolāsurabhayaṅkari,
sarvapāpahare devi mahālakṣmi namo'stu te. (2)

sarvajñe sarvavarade sarvaduṣṭabhayaṅkari,
sarvaduḥkhahare devi mahālakṣmi namo'stu te. (3)

siddhibuddhiprade devi bhuktimuktipradāyini,
mantrapūte sadā devi mahālakṣmi namo'stu te. (4)

ādyantarahite devi ādiśaktimaheśvari,
yogajñe yogasambhūte mahālakṣmi namo'stu te. (5)

sthūlasūkṣmamahāraudre mahāśakti mahodare,
mahāpāpahare devi mahālakṣmi namo'stu te. (6)

padmāsanasthite devi parabrahmasvarūpiṇi,
parameśi jaganmātarmahālakṣmi namo'stu te. (7)

śvetāmbaradhare devi nānālaṅkārabhūṣite,
jagatsthite jaganmātarmahālakṣmi namo'stu te. (8)

mahālakṣmyaṣṭakaṁ stotraṁ yaḥ paṭhed bhaktimānnaraḥ,
sarvasiddhimavāpnoti rājyaṁ prāpnoti sarvadā (9)

ekakālaṁ paṭhennityaṁ mahāpāpavināśanam,
dvikālaṁ yaḥ paṭhennityaṁ dhanadhānyasamanvitam (10)

trikālaṁ yaḥ paṭhennityaṁ mahāśatruvināśanam,
mahālakṣmīrbhavennityaṁ prasannā varadā śubhā (11)

## *Lakṣmī Anugrahaprāptimantrāḥ*

oṁ śrīṁ hrīṁ mahālakṣmyai ehi ehi sarvasaubhāgyaṁ dehi me namaḥ - mahālakṣmī
oṁ śrīṁ hrīṁ ehi ehi mahyaṁ hiraṇyaṁ dāpaya dāpaya svāhā - dhanalakṣmī
oṁ śrīṁ hrīṁ klīṁ santānalakṣmyai santānasamṛddhiṁ kuru kuru namaḥ - santānalakṣmī
oṁ śrīṁ hrīṁ klīṁ saubhāgyalakṣmyai sakalasaubhāgyaṁ dehi me namaḥ - saubhāgyalakṣmī
oṁ śrīṁ hrīṁ klīṁ vīralakṣmyai dehasaukhyaṁ dehi me namaḥ - vīralakṣmī
oṁ śrīṁ hrīṁ klīṁ vijayalakṣmyai sarvatra vijayapradāyinyai namaḥ - vijayalakṣmī
oṁ śrīṁ hrīṁ klīṁ bhāgyalakṣmyai sakalasaubhāgyaṁ dehi me svāhā- bhāgyalakṣmī
oṁ śrīṁ hrīṁ śrīṁ khaḍgalakṣmyai khaḍgadhāriṇyai namaḥ - khaḍgalakṣmī
oṁ śrīṁ hrīṁ śrīṁ lakṣmyai sarvakāraṇabhūteśyai namaḥ - kāruṇyalakṣmī
oṁ śrīṁ hrīṁ śrīṁ grahalakṣmyai sarvagrahadoṣanivāriṇyai namaḥ - grahalakṣmī
oṁ śrīṁ hrīṁ śrīṁ oṁ namo bhagavatyai sarvakāmapūriṇyai varalakṣmyai namaḥ - varalakṣmī
oṁ śrīṁ hrīṁ śrīṁ aiśvaryapradāyinyai namaḥ - aiśvaryalakṣmī
oṁ śrīṁ hrīṁ śrīṁ kuberalakṣmyai kuberasaukhyaṁ dehi me namaḥ - kuberalakṣmī
oṁ śrīṁ hrīṁ śrīṁ gajalakṣmyai lakṣmīkaṭākṣaṁ dehi me namaḥ - gajalakṣmī
oṁ śrīṁ hrīṁ śrīṁ dhairyalakṣmyai sarvasiddhiṁ dehi me namaḥ - dhairyalakṣmī

## *Atha Maṅgalanīrājanam –*

## *Āratī Śrīlakṣmī jī kī*

oṁ jaya lakṣmī mātā maiyā jaya lakṣmī mātā,
tumako niśadina sevata hara-viṣṇu-dhātā. oṁ…

umā ramā brahmāṇī tuma hī jaganmātā,
sūrya-candramā dhyāvata nārada ṛṣi gātā. oṁ…

durgā rūpa nirañjani sukha-saṁpati dātā,
jo koī tumako dhyāvata ṛddhi-siddhi-dhana pātā. oṁ…

tuma pātāla-nivāsini tuma hī śubhadātā,
karma-prabhāva-prakāśini bhavanidhi kī trātā. oṁ…

jisa ghara meṁ tuma rahatīṁ saba sadguṇa ātā,
saba saṁbhava ho jātā mana nahīṁ ghabarātā. oṁ…

tuma bina yajña na hote vastra na koī pātā,
khāna-pāna kā vaibhava saba tumase ātā. oṁ…

śubha-guṇa mandira sundara kṣīrodadhi-jātā,
ratna caturdaśa tuma bina koī nahīṁ pātā. oṁ…

mahālakṣmī jī kī ārati jo koi jana gātā,
ura ānanda samātā pāpa utara jātā. oṁ…

oṁ na tatra sūryo bhāti na candratārakam nemā vidyuto bhānti kuto'yamagniḥ,
tameva bhāntamanubhāti sarvaṁ tasya bhāsā sarvamidaṁ vibhāti.

***Atha Pūrṇapuṣpāñjaliḥ*** –
oṁ yo'pāṁ puṣpaṁ veda, puṣpavān prajāvān paśumān bhavati,
candramā vā apāṁ puṣpam, puṣpavān prajāvān paśumān bhavati,
ya evaṁ veda, yo'pāmāyatanaṁ veda, āyatanavān bhavati, hariḥ oṁ.
vedoktamantrapuṣpāñjaliṁ samarpayāmi.

***Atha Pradakṣiṇanamaskārāḥ*** –
oṁ yāni kāni ca pāpāni janmāntarakṛtāni ca, tāni tāni vinaśyanti pradakṣiṇapade pade.

oṁ śrīṁ hrīṁ śrīṁ kamale kamalālaye prasīda prasīda śrīṁ hrīṁ śrīṁ oṁ mahālakṣmyai namaḥ, pradakṣiṇanamaskārān samarpayāmi.

***Atha Kṣamāpaṇam*** –
oṁ āvāhanaṁ na jānāmi na jānāmi visarjanam, pūjāṁ caiva na jānāmi kṣamasva parameśvari.
mantrahīnaṁ kriyāhīnaṁ bhaktihīnaṁ sureśvari, yatpūjitaṁ mayā devi paripūrṇaṁ tadastu me.

***Atha Samarpaṇam*** –
kāyena vācā manasendriyairvā buddhyātmanā vā prakṛteḥ svabhāvāt,
karomi yadyat sakalaṁ parasmai nārāyaṇāyeti samarpayāmi.

***Atha Śāntimantraḥ*** –
oṁ pūrṇamadaḥ pūrṇamidaṁ pūrṇātpūrṇamudacyate, pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate.

oṁ śāntiḥ śāntiḥ śāntiḥ, hariḥ oṁ, śrī gurubhyo namaḥ, hariḥ oṁ.